346sk10

१०

स्त्रीप्रत्ययः - ङीप् प्रत्ययः

प्रस्तावना

अत्र स्त्रीप्रत्ययप्रकरणस्यादौ एव वर्णितं यद् अष्टौ स्त्रीप्रत्ययाः सन्ति। तेषु ङीप्प्रत्ययः अपि प्रमुखः प्रत्ययः अस्ति। तस्य विधायकानि अनेकानि सूत्राणि सन्ति। तेषु - ऋन्नेभ्यो ङीप् , उगितश्च, वयसि प्रथमे, द्विगोः, वर्णादनुदात्तात्तोपधात् तो नः, टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति एतानि सूत्राणि मुख्यानि अत्र चितानि च। तेषामेवात्र व्याख्यानं प्रस्तूयते।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- ङीप्प्रत्ययं ज्ञातुं शक्नुयात्।
- ङीप्प्रत्ययः कस्मात् प्रातिपदिकात् भवति इति ज्ञातुं प्रभवेत्।
- ङीप्प्रत्ययान्तशब्दं ज्ञातुं शक्नुयात्।
- ङीप्प्रत्ययस्य संयोजनेन शब्दपरिवर्तनं ज्ञातुं शक्नुयात्।
- ङीप्प्रत्ययस्य संयोजनं कृत्वा स्त्रीलिङ्गशब्दानां निर्माणे अर्हः भवेत्।
- पठनपाठनकाले तत्र तत्र शब्देषु ङीप्प्रत्ययः अस्ति न वा इति सुस्पष्टं ज्ञातुं प्रभवेत्।।

[१०.१] ऋन्नेभ्यो ङीप्॥ (४.१.५)

सूत्रार्थः - ऋदन्तात् प्रातिपदिकात् नान्तात् च प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

सूत्रावतरणम् - तत्र तावत् टाप् डाप् चाप् ङीप् ङीष् ङीन् इत्येते षट् मुख्यस्त्रीप्रत्ययाः सन्ति। तेषु ङीप्प्रत्ययः अपि एकः। तस्य प्रत्ययस्य विधानाय ऋन्नेभ्यो ङीप् इति सूत्रं रचितवान् भगवान् पाणिनिः।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। ऋन्नेभ्यः इति पञ्चमीबहुवचनान्तं पदम्। ङीप् इति प्रथमैकवचनान्तं पदम्। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते।

प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। ऋन्नेभ्यः इति पदं समस्तं वर्तते। अत्र च इतरेतरयोगद्वन्द्वसमासः अस्ति। तस्य च विग्रहः भवति ऋत् च नश्च इति ऋन्नः, तेभ्यः ऋन्नेभ्यः। एवञ्च अस्य अर्थः भवति ऋतः नात् इति। तत्र ऋतः इति नात् इति च प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण अत्र तदन्तविधिः भवति। तेन ऋदन्तात् प्रातिपदिकात् नान्तात् प्रातिपदिकात् च इति लभ्यते। ततश्च सूत्रार्थः भवति - ऋदन्तात् प्रातिपदिकात् नान्तात् च प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः परः भवति।

उदाहरणम् - कर्त्री। दण्डिनी।

सूत्रार्थसमन्वयः -

कर्त्री। अत्र कर्तृ इति शब्दः ऋदन्तः अस्ति, अपि च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च ऋदन्तं प्रातिपदिकम् अस्ति कर्तृ इति। तस्मात् स्त्रीत्वे द्योत्ये ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप्प्रत्ययो भवति तेन कर्तृ ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कर्तृ ई इति स्थितिः भवति। ततः परम् इको यणचि इति सूत्रेण यणादेशे कृते वर्णसम्मेलने च कृते कर्त्री इति रूपं सिद्ध्यति।

दण्डिनी। अत्र दण्डिन् इति शब्दः नान्तः अस्ति, अपि च कृत्तद्धितसमासाश्च इति सूत्रेण प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च नान्तं प्रातिपदिकम् अस्ति दण्डिन् इति। तस्मात् स्त्रीत्वे द्योत्ये ऋन्नेभ्यो ङीप् इति सूत्रेण ङीप्प्रत्ययो भवति। तेन दण्डिन् ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन दण्डिन् ई इति स्थितिः भवति। ततः परं वर्णसम्मलेने कृते सति दण्डिनी इति रूपे सिद्ध्यति।

[१०.२] उगितश्च॥ (४.१.६)

सूत्रार्थः - उगिदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। उगितः इति पञ्चम्येकवचनान्तं पदम्। च इति अव्ययपदम्। अत्र ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। उगितः इति पदं समस्तं वर्तते। अत्र च बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति। उक् इत् यस्य सः उगित्, तस्य उगितः। तत्र उगितः इति पदं प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण अत्र तदन्तविधिः भवति। तेन उगिदन्तात् प्रातिपदिकात् इति लभ्यते। ततश्च सूत्रार्थः भवति - उगिदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

उदाहरणम् - पचन्ती। भवन्ती। नमन्ती। पठन्ती। पतन्ती।

सूत्रार्थसमन्वयः -

पचन्ती। पच् इति धातोः वर्तमाने लट् इति सूत्रेण लट्प्रत्यये सति पच् लट् इति जायते। ततः लटः स्थाने लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रेण शतृप्रत्यये कृते पच् शतृ इति जाते शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, ऋकारस्य उपदेशेऽजनुनासिक इत्, इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति पच् अत् इति जायते। ततः शतुः शित्त्वात् तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति सूत्रेण शप्प्रत्यये सति पच् शप् अत् इति जायते। ततः शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति पच् अ अत् इति जायते। ततश्च अतो गुणे इति सूत्रेण पररूपे पचत् इति सिद्ध्यति। तत्र शतृप्रत्ययस्य ऋकारस्य इत्संज्ञा भवति। तेन शतृप्रत्ययः उगित् अस्ति। ततश्च पचत् इति शब्दः उगिदन्तः अस्ति। अपि च कृत्तद्धितसमासाश्च इति सूत्रेण तस्य प्रातिपदिकसंज्ञा भवति। तेन पचत् इति उगिदन्तं प्रातिपदिकम् अस्ति। अतः उगिदन्तात् प्रातिपदिकात् पचत् इत्यतः उगितश्च इति सूत्रेण ङीप्प्रत्ययः भवति। तेन पचत् ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन पचत् ई इति जायते। ततः शप्श्यनोर्नित्यम् इति नुमागमे अनुबन्धलोपे च सति पचन्त् ई इति स्थिते वर्णमेलने च पचन्ती इति रूपं सिध्यति।

भवन्ती। भू इति धातोः वर्तमाने लट् इति सूत्रेण लट्प्रत्यये सति भू लट् इति जायते। ततः लटः स्थाने लटः शतृशानचावप्रथमासमानाधिकरणे इति सूत्रेण शतृप्रत्यये कृते भू शतृ इति जाते शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, ऋकारस्य उपदेशेऽजनुनासिक इत् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति भू अत् इति जायते। ततः शतुः शित्त्वात् तिङ्शित्सार्वधातुकम् इति सूत्रेण सार्वधातुकसंज्ञायाम्, कर्तरि शप् इति सूत्रेण शप्प्रत्यये सति भू शप् अत् इति जायते। ततः शकारस्य लशक्वतद्धिते इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे, पकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञायाम्, तस्य लोपः इति सूत्रेण लोपे सति भू अ अत् इति जायते। ततश्च शपः अपि शित्त्वेन सार्वधातुकत्त्वात् सार्वधातुकार्धधातुकयोः इति सूत्रेण भुवः ऊकारस्य गुणे ओकारे एचोऽयवायावः इति सूत्रेण अव् इत्यादेशे च कृते भव् अ अत् इति जाते अतो गुणे इति सूत्रेण पररूपे भवत् इति सिद्ध्यति। अत्र शतृप्रत्ययस्य ऋकारस्य इत्संज्ञा भवति। तेन शतृप्रत्ययः उगित् अस्ति। ततश्च भवत् इति शब्दः उगिदन्तः अस्ति। अपि च कृत्तद्धितसमासाश्च इति सूत्रेण तस्य प्रातिपदिकसंज्ञा भवति। तेन भवत् इति उगिदन्तं प्रातिपदिकम् अस्ति। अतः उगिदन्तात् प्रातिपदिकात् भवत् इत्यतः उगितश्च इति सूत्रेण ङीप्प्रत्ययः भवति। तेन भवत् ङीप् इति भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन भवत् ई इति जायते। ततः नुमागमे अनुबन्धलोपे च सति भवन्ती इति रूपं सिध्यति। अन्यानि उदाहरणानि एवमेव सिद्ध्यन्तीत्यूह्यम्।

[१०.३] वयसि प्रथमे॥ (४.१.२०)

सूत्रार्थः - प्रथमवयोवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् द्वे पदे स्तः। वयसि इति सप्तम्येकवचनान्तं पदम्। प्रथमे इति सप्तम्येकवचनान्तं पदम्। अत्र ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदम्, अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र सूत्रे प्रथमे इति वयसि इत्यस्य विशेषणं भवति, वयसि इति च प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन प्रथमवयोवाचकात् इत्यर्थः समायाति। अतः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अदन्तात् प्रातिपदिकात् इत्यर्थो भवति। ततश्च सूत्रार्थो भवति - प्रथमवयोवाचकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति। प्राणिनाम् कालकृतावस्थाविशेषो वयः। तच्च कौमारं यौवनं वार्धकम् इति त्रिधा।

पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रस्तु स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति।।

इति शास्त्रवचनमत्र प्रमाणम्। केषांचिद् आचार्याणां मते वयः चतुर्विधम्। तथाहि पद्यम् -

आद्ये वयसि नाधीतं द्वितीये नार्जितं धनम्।
तृतीये न तपस्तप्तं चतुर्थे किं करिष्यति।।

एवं त्रिविधं वा भवतु, चतुर्विधं वा वयः भवतु। प्रथमं वयः तु कौमारं वयः इत्येव।

उदाहरणम् - कुमारी। वधूटी। चिरन्टी।

सूत्रार्थसमन्वयः -

कुमारी। कुमार इति शब्दः अदन्तः अस्ति, अपि च प्रातिपदिकमपि अस्ति। एवमेव प्रथमवयसि विद्यमानानां शिशूनां वाचकः अपि अस्ति। अतः स्त्रीत्वविवक्षायां प्रथमवयोवाचकात् अदन्तात् कुमार इति प्रातिपदिकात् वयसि प्रथमे इति सूत्रेण ङीप्प्रत्ययः भवति। तेन कुमार ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कुमार ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण कुमार इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते कुमारी इति रूपं सिध्यति।

[१०.४] द्विगोः॥ (४.१.२१)

सूत्रार्थः - अदन्तात् द्विगुसंज्ञकात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् एकमेव पदम् अस्ति। द्विगोः इति पञ्चम्यन्तं पदम्। अत्र ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदम्, अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र सूत्रे द्विगोः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन द्विगुसंज्ञकात् प्रातिपदिकात् इत्यर्थः समायाति। अतः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। ततश्च येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अदन्तात् प्रातिपदिकात् इत्यर्थो भवति। ततश्च सूत्रार्थो भवति - द्विगुसंज्ञकात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति।

उदाहरणम् - त्रिलोकी। त्रिपादी। अष्टाध्यायी। पञ्चवटी। चतुःसूत्री। दशरथी। पञ्चमूली। पञ्चलक्षणी।

सूत्रार्थसमन्वयः -

त्रिलोकी। त्रिलोक इति शब्दे द्विगुः समासः अस्ति। तथाहि त्रयाणां लोकानां समाहारः इति विग्रहे तद्धितार्थोत्तरपदसमाहारे च इति सूत्रेण समासः भवति। ततः परं संख्यापूर्वो द्विगुः इति सूत्रेण तस्य द्विगुसंज्ञा भवति। एवमेव त्रिलोक इति शब्दः अदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां द्विगुसंज्ञकात् अदन्तात् त्रिलोक इति प्रातिपदिकात् द्विगोः इति सूत्रेण ङीप्प्रत्ययः भवति। तेन त्रिलोक ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन त्रिलोक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण त्रिलोक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते त्रिलोकी इति रूपं सिध्यति।

[१०.५] वर्णादनुदात्तात्तोपधात्तो नः॥ (४.१.३९)

सूत्रार्थः - वर्णवाचकात् तोपधात् अनुपसर्जनात् अनुदात्तान्तात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीप् प्रत्ययः भवति, तकारस्य स्थाने नकारश्च भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् चत्वारि पदानि सन्ति। वर्णात् इति पञ्चम्यन्तं पदम्। अनुदात्तात् इति पञ्चम्यन्तं पदम्। तोपधात् इति पञ्चम्यन्तं पदम्। तः इति षष्ठ्यन्तं पदम्। नः इति प्रथमान्तं पदम्। अत्र सूत्रे ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदमनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। मनोरौ वा इति सूत्रात् वा इति अव्ययपदमनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। तोपधात् इति पदमत्र समस्तं वर्तते। अत्र बहुव्रीहिसमासः अस्ति। तथाहि तः उपधा यस्य सः तोपधः। तस्मात् तोपधात्। अत्र सूत्रे अनुदात्तात् इति पदं अतः इति पदं च प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन अनुदात्तात् इत्यत्र अतः इत्यत्र च तदन्तविधिः भवति। तेन अनुदात्तात्

इत्यस्य अनुदात्तान्तात् इत्यर्थः। अतः इत्यस्य अदन्तात् इत्यर्थश्च भवति। वर्णात् इति पदम्, तोपधात् इति पदम्, अनुपसर्जनात् इति च प्रातिपदिकात् इत्यस्यैव विशेषणं भवति। तेन सूत्रार्थः भवति - वर्णवाचकात् तोपधात् अनुपसर्जनात् अनुदात्तान्तात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये वा ङीप् प्रत्ययः भवति, तकारस्य स्थाने नकारश्च भवति।

उदाहरणम् - एनी एता। रोहिणी रोहिता। श्येनी श्येता। हरिणी हरिता।

सूत्रार्थसमन्वयः -

एनी, एता। अत्र एत इति शब्दः अस्ति। अयं चित्रवर्णस्य वाचकः अस्ति। पुनः अस्य शब्दस्य उपधायां तकारः अस्ति। अतः अयं शब्दः तोपधः अपि अस्ति। एत इति शब्दस्य अन्त्यः अकारः अनुदात्तः अस्ति। अतः अयं शब्दः अनुदात्तान्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। पुनः अदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां वर्णवाचकात् तोपधात् अनुदात्तान्तात् अनुपसर्जनात् अदन्तात् एत इति प्रातिपदिकात् वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रेण ङीप् प्रत्ययः, तकारस्य नकारश्च भवति। तेन एन ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन एन ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण एन इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते एनी इति रूपं सिध्यति। एवञ्च वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रं विकल्पेन प्रवर्तते। यदा अस्य सूत्रस्य प्रवृत्तिः नैव भवति, तदा एत इत्यस्य अदन्तत्वात् स्त्रीत्वविवक्षायाम् अजाद्यतष्टाप् इति सूत्रेण टापि कृते एता इति रूपं सिध्यति।

रोहिणी, रोहिता। अत्र रोहित इति शब्दः अस्ति। अयं रक्तवर्णस्य वाचकः अस्ति। पुनः अस्य शब्दस्य उपधायां तकारः अस्ति। अतः अयं शब्दः तोपधः अपि अस्ति। रोहित इति शब्दस्य अन्त्यः अकारः अनुदात्तः अस्ति। अतः अयं शब्दः अनुदात्तान्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। पुनः अदन्तः अस्ति। अपि च प्रातिपदिकमपि अस्ति। अतः स्त्रीत्वविवक्षायां वर्णवाचकात् तोपधात् अनुदात्तान्तात् अनुपसर्जनात् अदन्तात् रोहित इति प्रातिपदिकात् वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रेण ङीप् प्रत्ययः, तकारस्य नकारश्च भवति। तेन रोहिन ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन रोहिन ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण रोहिन इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे नकारस्य णकारे च कृते वर्णसम्मेलने च कृते रोहिणी इति रूपं सिध्यति। पुनः वर्णादनुदात्तात्तोपधात्तो नः इति सूत्रं विकल्पेन प्रवर्तते। एवञ्च यदा अस्य सूत्रस्य प्रवृत्तिः नैव भवति, तदा रोहित इत्यस्य अदन्तत्वात् स्त्रीत्वविवक्षायाम् अजाद्यतष्टाप् इति सूत्रेण टापि कृते रोहिता इति रूपं सिध्यति।

[१०.६] टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः॥ (४.१.१५)

सूत्रार्थः - टिदन्तात् ढप्रत्ययान्तात् अण्-प्रत्ययान्तात् अञ्-प्रत्ययान्तात् द्वयसच्-प्रत्ययान्तात् दघ्नञ्-प्रत्ययान्तात् मात्रच्-प्रत्ययान्तात् तयप्-प्रत्ययान्तात् ठक्-प्रत्ययान्तात् ठञ्-प्रत्ययान्तात् कञ्-प्रत्ययान्तात् क्वरप्-प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात्।

सूत्रव्याख्या - इदं विधिसूत्रम्। इदं सूत्रं ङीप्प्रत्ययं विदधाति। सूत्रेऽस्मिन् एकमेव पदमस्ति। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति पञ्चम्येकवचनान्तं पदम्। अत्र सूत्रे ऋन्नेभ्यो ङीप् इति सूत्रात् ङीप् (१/१) इति पदमनुवर्तते। अजाद्यतष्टाप् इति सूत्रात् अतः (५/१) इति पदं च अनुवर्तते। अत्र सूत्रे स्त्रियाम् (७/१) इति अधिकारः आगच्छति। अपि च ङ्याप्प्रातिपदिकात् इति सूत्रात् प्रातिपदिकात् (५/१) इति अनुवर्तते। प्रत्ययः (१/१) इति अधिकारः परश्च इति अधिकारः च अत्र आगच्छति। अत्र अनुपसर्जनात् इति अधिकारः आगच्छति। टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति पदं समस्तमस्ति। अत्र च समाहारद्वन्द्वसमासः अस्ति। अस्य च विग्रहः भवति - टित् च ढः च अण् च अञ् च द्वयसच् च दघ्नञ् च मात्रच् च तयप् च ठक् च ठञ् च कञ् च क्वरप् च इति टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरप्। तस्मात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति। अत्र टित् इति पदं समस्तमस्ति। अत्र च बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति ट् इत् यस्य सः टित्। अर्थात् टकारेत्संज्ञकः। अत्र सूत्रे टित्पदेन टितः प्रातिपदिकस्य प्रत्ययस्य धातोः च ग्रहणम् अस्ति। पुनः टिदंशे तदन्तविधिः भवति। तेन टितः इत्यस्य टिदन्तात् इत्यर्थः। सूत्रे ढ इत्यतः आरभ्य क्वरप्पर्यन्तं सर्वे अपि प्रत्ययाः सन्ति। सर्वत्रैव च तदन्तविधिः भवति प्रत्ययग्रहणे तदन्ता ग्राह्या इति परिभाषया। तेन च ढप्रत्ययान्तात् अण्प्रत्ययान्तात् अञ्प्रत्ययान्तात् द्वयसच्प्रत्ययान्तात् दघ्नञ्प्रत्ययान्तात् मात्रच्प्रत्ययान्तात् तयप्प्रत्ययान्तात् ठक्प्रत्ययान्तात् ठञ्प्रत्ययान्तात् कञ्प्रत्ययान्तात् क्वरप्प्रत्ययान्तात् इत्यर्थः तेषां लभ्यते। एतेषां समेषामपि प्रातिपदिके अन्वयः भवति। अत्र सूत्रे अतः इति प्रातिपदिकात् इत्यस्य विशेषणं भवति। तेन अतः इत्यंशे येन विधिस्तदन्तस्य इति सूत्रेण तदन्तविधिः भवति। तेन अतः इत्यस्य अदन्तात् इत्यर्थो भवति। अनुपसर्जनात् इत्यपि प्रातिपदिकात् इत्यत्र अन्वेति। एवञ्च सूत्रार्थो भवति - टिदन्तात् ढप्रत्ययान्तात् अण्प्रत्ययान्तात् अञ्प्रत्ययान्तात् द्वयसच्प्रत्ययान्तात् दघ्नञ्प्रत्ययान्तात् मात्रच्प्रत्ययान्तात् तयप्प्रत्ययान्तात् ठक्प्रत्ययान्तात् ठञ्प्रत्ययान्तात् कञ्प्रत्ययान्तात् क्वरप्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात्।

उदाहरणम् - नदी। कुरुचरी। सौपर्णेयी। ऐन्द्री। कुम्भकारी। औत्सी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। पञ्चतयी। आक्षिकी। लावणिकी। यादृशी। इत्वरी।

सूत्रार्थसमन्वयः -

नदी। टिदन्तात् अदन्तात् अनुपसर्जनात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः भवति इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र नदट् इति शब्दः अस्ति। अस्य टकारस्य हलन्त्यम् इति सूत्रेण इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण लोपः भवति। तेन नद इति अवशिष्यते। इदं टित् प्रातिपदिकमस्ति। अपि च व्यवदेशिवद्भावेन टिदन्तम् अपि अस्ति। अदन्तमपि अस्ति। अनुपसर्जनमपि अस्ति। तस्मात् टिदन्तात् अनुपसर्जनात् अदन्तात् नद इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन नद ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन नद ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण नद इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते नदी इति रूपं सिध्यति। एवमेव देवी चोरी इत्यादावपि बोध्यम्।

कुरुचरी। टिदन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र कुरुचर इति शब्दः अस्ति। अयं शब्दः कुरुषु चरति इत्यर्थे कुरु सु चर् इत्यतः चरेष्टः इति सूत्रेण टप्रत्यये कृते सति सिध्यति। तस्मादयं शब्दः टिदन्तः अस्ति। अपि च अदन्तः अपि अस्ति। अनुपसर्जनम् अपि अस्ति। प्रातिपदिकम् अपि अस्ति। अतः टिदन्तात् अनुपसर्जनात् अदन्तात् कुरुचर इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन कुरुचर ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कुरुचर ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण कुरुचर इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते कुरुचरी इति रूपं सिध्यति।

सौपर्णेयी। ढप्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र सौपर्णेय इति शब्दः अस्ति। अयं शब्दः सुपर्ण्याः अपत्यं स्त्री इत्यर्थे स्त्रीभ्यो ढक् इति सूत्रेण ढक्-प्रत्यये कृते सति सिध्यति। तस्मादयं शब्दः ढप्रत्ययान्तः अस्ति। अपि च अदन्तः अपि अस्ति। अनुपसर्जनम् अपि अस्ति। प्रातिपदिकम् अपि अस्ति। अतः ढप्रत्ययान्तात् अनुपसर्जनात् अदन्तात् सौपर्णेय इति प्रातिपदिकात् स्त्रीत्वे द्योत्ये टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन सौपर्णेय ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन सौपर्णेय ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण सौपर्णेय इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते सौपर्णेयी इति रूपं सिध्यति। एवमेव वैनतेयी इत्यादावपि बोध्यम्।

ऐन्द्री। अणन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र ऐन्द्र इति शब्दः अस्ति। अयं शब्दः इन्द्रो देवता अस्याः इति विग्रहे इन्द्रशब्दात् सास्य देवता इति सूत्रेण अण् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः अण्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च अण्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऐन्द्र इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऐन्द्र ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऐन्द्र ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऐन्द्र इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऐन्द्री इति रूपं सिध्यति।

कुम्भकारी। अणन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य इदम् उदाहरणम् अस्ति। अत्र कुम्भकार इति शब्दः अस्ति। अयं शब्दः कुम्भं करोति इति विग्रहे कुम्भ अम् कृ इत्यतः कर्मण्यण् इति सूत्रेण अण् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः अण्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च अण्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् कुम्भकार इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन कुम्भकार ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन कुम्भकार ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण कुम्भकार इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते कुम्भकारी इति रूपं सिध्यति।

औत्सी। इदम् अञन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र औत्स इति अस्ति। अयं शब्दः उत्सस्य इयम् इति विग्रहे उत्स इति शब्दात् उत्सादिभ्योऽञ् इति सूत्रेण अञ् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः अञ्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च अञ्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् औत्स इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन औत्स ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन औत्स ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण औत्स इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते औत्सी इति रूपं सिध्यति।

ऊरुद्वयसी। इदम् द्वयसजन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र ऊरुद्वयस इति अस्ति। अयं शब्दः ऊरू प्रमाणम् अस्याः इति विग्रहे ऊरू इति शब्दात् प्रमाणे द्वयसजदघ्नञ्मात्रचः इति सूत्रेण द्वयसच् इति प्रत्यये कृते

सति सिध्यति। एवञ्च अयं शब्दः द्वयसच्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च द्वयसच्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऊरुद्वयस इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऊरुद्वयस ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऊरुद्वयस ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऊरुद्वयस इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऊरुद्वयसी इति रूपं सिध्यति।

ऊरुदघ्नी। इदम् दघ्नजन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र ऊरुदघ्न इति अस्ति। अयं शब्दः ऊरू प्रमाणम् अस्याः इति विग्रहे ऊरू इति शब्दात् प्रमाणे द्वयसजदघ्नञ्मात्रचः इति सूत्रेण दघ्नच् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः दघ्नच्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च दघ्नच्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऊरुदघ्न इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऊरुदघ्न ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऊरुदघ्न ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऊरुदघ्न इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऊरुदघ्नी इति रूपं सिध्यति।

ऊरुमात्री। इदम् मात्रजन्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र ऊरुमात्र इति अस्ति। अयं शब्दः ऊरू प्रमाणम् अस्याः इति विग्रहे ऊरू इति शब्दात् प्रमाणे द्वयसजदघ्नञ्मात्रचः इति सूत्रेण मात्रच् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः मात्रच्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च मात्रच्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् ऊरुमात्र इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन ऊरुमात्र ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन ऊरुमात्र ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण ऊरुमात्र इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते ऊरुमात्री इति रूपं सिध्यति।

पञ्चतयी। इदम् तयप्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र पञ्चतय इति अस्ति। अयं शब्दः पञ्च अवयवाः अस्याः इति विग्रहे पञ्च इति शब्दात् संख्यायाः अवयवे तयप् इति सूत्रेण तयप् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः तयप्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च तयप्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् पञ्चतय इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन

पञ्चतय ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन पञ्चतय ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण पञ्चतय इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते पञ्चतयी इति रूपं सिध्यति।

आक्षिकी। इदम् ठक्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र आक्षिक इति अस्ति। अयं शब्दः अक्षैः दीव्यति इति विग्रहे अक्ष इति शब्दात् तेन दीव्यति खनति जयति जितम् इति सूत्रेण ठक् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः ठक्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च ठक्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् आक्षिक इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन आक्षिक ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन आक्षिक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण आक्षिक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते आक्षिकी इति रूपं सिध्यति।

लावणिकी। इदम् ठञ्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र लावणिक इति अस्ति। अयं शब्दः लवणं पण्यम् अस्याः इति विग्रहे लवण इति शब्दात् लवणाट् ठञ् इति सूत्रेण ठञ् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः ठञ्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च ठञ्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् लावणिक इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन लावणिक ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन लावणिक ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण लावणिक इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते लावणिकी इति रूपं सिध्यति।

यादृशी। इदम् कञ्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र यादृश इति अस्ति। अयं शब्दः यत् इति शब्दात् त्यदादिषु दृशोऽनालोचने कञ् इति सूत्रेण कञ् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः कञ्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च कञ्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् यादृश इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन यादृश ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन यादृश ई इति स्थितिः

भवति। ततः यचि भम् इति सूत्रेण यादृश इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते यादृशी इति रूपं सिध्यति।

इत्वरी। इदम् क्वरप्प्रत्ययान्तात् अनुपसर्जनात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीप् प्रत्ययः स्यात् इत्यंशस्य उदाहरणम् अस्ति। अत्र इत्वर इति अस्ति। अयं शब्दः इण् इति धातोः इण्नशजिसर्तिभ्यः क्वरप् इति सूत्रेण क्वरप् इति प्रत्यये कृते सति सिध्यति। एवञ्च अयं शब्दः क्वरप्प्रत्ययान्तः अस्ति। अदन्तः अपि अस्ति। अनुपसर्जनः अपि अस्ति। प्रातिपदिकसंज्ञकः अपि अस्ति। एवञ्च क्वरप्प्रत्ययान्तात् अदन्तात् अनुपसर्जनात् इत्वर इति प्रातिपदिकात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रेण ङीप् प्रत्ययः भवति। तेन इत्वर ङीप् इति स्थितिः भवति। ततः लशक्वतद्धिते इति सूत्रेण ङीपः ङकारस्य इत्संज्ञा भवति। हलन्त्यम् इति सूत्रेण पकारस्य इत्संज्ञा भवति। तस्य लोपः इति सूत्रेण च उभयोः लोपः भवति। तेन इत्वर ई इति स्थितिः भवति। ततः यचि भम् इति सूत्रेण इत्वर इत्यस्य भसंज्ञा भवति। तेन च यस्येति च इति सूत्रेण अन्त्यस्य अकारस्य लोपे वर्णसम्मेलने च कृते इत्वरी इति रूपं सिध्यति।

पाठगतप्रश्नाः

अत्र केचन पाठगतप्रश्नाः प्रदीयन्ते।

१. ऋन्नेभ्यः इति पदे कः समासः, कश्च विग्रहः।

२. उगितः इति पदे कः समासः कश्च विग्रहः।

३. तोपधात् इति पदे कः समासः कश्च विग्रहः।

४. कुम्भकारी इत्यस्य कः विग्रहः।

५. ऊरुद्वयसी इत्यस्य कः अर्थः।

६. पञ्चतयी इत्यस्य कः अर्थः।

पाठसारः

ऋन्नेभ्यो ङीप् इति सूत्रं ङीप्प्रत्ययविधायकेषु सूत्रेषु प्रमुखं सूत्रमस्ति, तस्य सर्वप्रथमम् अत्र पाठे व्याख्या वर्तते। ततः परम् उगितश्च इति सूत्रस्य व्याख्या अस्ति। तदन्तरं वयसि प्रथमे इति सूत्रस्य व्याख्या विद्यते। तत्पश्चात् द्विगोः इति सूत्रस्य व्याख्या वर्तते। ततश्च वर्णादनुदात्तात्तोपधात् तो नः इति सूत्रस्य व्याख्यानं विद्यते। अन्तिमे च टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रस्य व्याख्या अस्ति। एवञ्च यथासम्भवम् उदाहरणेषु सूत्रार्थस्य समन्वयः अपि प्रदर्शितः अस्ति।

पाठान्तप्रश्नाः-

अत्र परीक्षोपयोगिनः प्रष्टव्याः प्रश्नाः प्रदीयन्ते।

१. ऋन्नेभ्यो ङीप् इति सूत्रस्य व्याख्यां लिखत।

२. उगितश्च इति सूत्रं व्याख्यात।

३. वयसि प्रथमे इति सूत्रस्य व्याख्यानं कुर्वन्तु।

४. द्विगोः इति सूत्रस्य व्याख्यानं लिख।

५. वर्णादनुदात्तात्तोपधात् तो नः इति सूत्रस्य व्याख्यां लिखन्तु।

६. टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः इति सूत्रस्य व्याख्या कार्या।

७. सौपर्णेयी इति प्रयोगं साधयत।

८. कुमारी इति प्रयोगः साधनीयः।

९. भवन्ती इति प्रयोगस्य सिद्धिप्रक्रियां लिखत।

१०. इत्वरी इति प्रयोगस्य सिद्धिं लिखन्तु।

११. रोहिणी, रोहिता इत्यनयोः प्रयोगयोः सिद्धिः कार्या।

पाठगतप्रश्नोत्तराणि -

१. ऋन्नेभ्यः इति पदे इतरेतरयोगद्वन्द्वसमासः अस्ति। तस्य च विग्रहः भवति - ऋच्च नश्च इति ऋन्नः, तेभ्यः ऋन्नेभ्यः।

२. उगितः इति पदे बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति - उक् इत् यस्य सः उगित्। तस्य उगितः।

३. तोपधात् इति पदे बहुव्रीहिसमासः अस्ति। तस्य च विग्रहः भवति - तः उपधा यस्य सः तोपधः। तस्मात् तोपधात्।

४. कुम्भं करोति या सा कुम्भकारी इति विग्रहः।

५. ऊरू प्रमाणम् अस्याः इति ऊरुद्वयसी इत्यस्य अर्थः।

६. पञ्च अवयवाः अस्याः इति पञ्चतयी इत्यस्य अर्थः।

॥ इति दशमः पाठः॥